National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 06-10
© 2026 NJHSR
www.sanskritarticle.com

**डा राघवेन्द्रः**
सहप्राध्यापकः ,
क्रैस्ट् अकाडेमी इन्स्टिट्यूत् फार् - अड्वान्स्ड् स्टडीस्, बेङ्गलूरु.

**Correspondence:**
**डा राघवेन्द्रः**
सहप्राध्यापकः ,
क्रैस्ट् अकाडेमी इन्स्टिट्यूत् फार् - अड्वान्स्ड् स्टडीस्, बेङ्गलूरु.

# भारतीयवास्तुशास्त्रे गृहनिर्माणस्य अवधेयांशाः

**डा राघवेन्द्रः**

**सारसंक्षेपः**

भारतीयाः नैकशास्त्रेषु निष्णाताः आसन्। अपि तु जगति लभ्यमानानां सर्वेषां विषयाणां ज्ञाताः आसन्निति तु अस्मान् तुष्यति। तत्र रसायनशास्त्रम्, खगोळशास्त्रम्, वैद्यकीयशास्त्रम्, तन्त्रशास्त्रम्, अर्थशास्त्र काव्यशास्त्रम् वास्तुशास्त्रम् इत्यादीनि। तत्र वास्तुशास्त्रस्य विषये अधिकं ज्ञास्यामः। भारतीयवास्तुशास्त्रम् जगति सुप्रसिद्धम्। अस्येतिहासः प्रायः वेदकालादाभ्यते इति ऊह्यते। यतः ग्रामनगराणाम् उल्लेखो तत्र दृश्यते।

वास्तु इतुक्ते किमिति जिज्ञासा उद्भवति श्रोतॄणां मनांसि। तस्य समाधानमेवं क्रियते | वसन्ति प्राणिनो यत्र, गृहकरणयोग्यभूमिः, इत्यादीनि वाक्यानि वास्तु पदस्य स्थूलपरिचयं कर्तुं पारयति। अस्मिन् विषये श्रीहरिः एवं निरूपयति।

**वास्तु संक्षेपतो वक्ष्ये गृहादौ विघ्ननाशनम्।**
**ईशानकोणादारभ्य ह्येकाशीतिपदे यजेत्।**
**ईशाने च शिरःपादौ नैरृतेऽग्न्यनिले क्करौ।**
**आवासवासवेश्मादौ पुरे ग्रामे वणिक्पथे॥**

वास्तुशास्त्रं न केवलं विषयवर्णनशास्त्रम्, शास्त्रमेतत् विघ्ननिवारकम्, प्रत्येकस्यापि स्थानस्य प्रामुख्यता वर्णनमत्र दृश्यते। तथैव अस्माकं गृहं कथं भवेदिति वक्ष्यते। अस्मिन् आधुनिके युगेऽपि शास्त्रस्यास्य प्रमुख्यता अल्पापि अविनष्ठा अपि तु देश विदेशेषु जनप्रिया जाता। एवमेव जनाः वास्तुविचारम् अनुसर्तुं प्रारब्धाः सन्ति। अत्र ये विषयाः उक्ता ते सर्वे संशोधनयोग्याः एव अत्र नैव सन्देहः। तथा अपि ये विषयाः अत्र उक्ताः ते आधुनिककालीन गृहनिर्माणावसरे कथम् अनुसरणीयाः इति बहवोवास्तुशास्त्रज्ञाः अपि संशयं प्रदर्शयन्ति। एषः शोधलेखः प्राचीनकालीनवास्तुशास्त्रस्य उपयोगः अस्मिन् नवीनकाले कथं क्रियते इति प्रतिपादयति। तथैव बहूनि गृहनिर्माणोपयोगीनि मौल्यानि निरूपयति। अनेन जनाः भारतीय वास्तुशास्त्रं कथं वैशिष्ठ्यपूर्णमस्तीति ज्ञास्यन्ते। अस्मिन् शोधलेखे मयमोत्म्, मानसारः, समराङ्गणसूत्रधारः एवमेव अन्येषां वास्तुशास्त्रग्रन्थानां तौलनिकविषयनिरूपणं क्रियते। तद्वारा विषयमण्डनमपि क्रियते।

मृत्तिकायाः भित्तिः, सोपानमार्गम्, द्वारनिर्माणम्, स्तम्भनिर्माणम्, उद्यानम्, एवमेव गृहनिर्माणकाले उपयुज्यमानानाम् उपकरणानां विषये परिचयः वर्णनमपि क्रियते। तथैव भारतीय वास्तुशास्त्रस्य वैज्ञानिके युगे मेलनं कथं सम्भवति इत्यत्र निरूप्यते। निश्चयेन शोधलेखोऽयम् उपकारकं भवतीति वक्तुमहं नितरां मोदये।

**मूलपदानि** = वास्तुशास्त्रम्, भूमिः, दिक्, अधिदेवता, वैज्ञानिकम्, स्थापनम्, निर्माणम्, प्राकारम्, खननम् इत्यादीनि।

**पीठिका -**

भारतीय वास्तुशास्त्रम् जगति सुप्रसिद्धम्। शास्त्रमेतत् न केवलं साधारणं शास्त्रम् अपि तु परम्परागतं विज्ञानशास्त्रम्। शास्त्रेऽस्मिन् ब्रह्माण्डनियमानि, परिसरशास्त्रम्, मानवजीवनस्य समतोलनता, ज्यामिति इत्यादयो विचाराः वर्णिताः सन्ति। मूलतत्वमेतस्य शास्त्रस्य किमिति विवक्षिते गृहादयो निर्माणं पञ्चभूतैः सह समन्वयं कृत्वा गृहादि निर्माणकार्यं कुर्यादिति। यतः अद्यापि शास्त्रस्यास्य प्रभावः

गृहनिर्माणे देवालयनिर्माणे नगरादि निर्माणे इत्यादिषु क्षेत्रेषु च दृश्यते। अस्य विषयस्य विशेषवर्णनं मयमतम्, मयसारः, समराङ्गणसूत्रधारः, केषुचित् पुराणेषु च उपलभ्यते।

मानवजीवनम् प्रकृतिसमन्वयश्च

मानवः अपि अस्य विश्वस्य कश्चन भागः एव। अतः गृहनिर्माणावसरे अधोलिखितविषयाणां विचारे अवधानं दद्यात्।

१. दिशः

२. रवेः चलनम्

३. वायोः गतिः

४. भूमेः आकर्षणशक्तिः

यतः अस्मात्

उत्तमः वायुसञ्चारः

नैसर्गिकदीपस्य व्यवस्था

समशीतोष्णता

समन्वयता इत्यादयः सिध्यन्ति।

एषः विचारः आधुनिकवास्तुतत्वं समर्थयति।

बहवो जनाः प्रधानद्वारं पूर्वाभिमुखे एव कुर्वन्ति। अत्र प्रमुखं कारणं शास्त्रम्। यतः द्वादशराशिषु सिंहादि राशयः पूर्वाभिमुखाः इत्येव प्रसिद्धाः। ये जनाः तेषु राशिषु जनिताः ते प्रधानद्वारं पूर्वाभिमुखमेव कुर्वन्ति। इति तु सामान्यविचारः। को विशेषः इत्युक्ते वैज्ञानिककारणमपि अत्र अस्ति। प्रातः सूर्योदयसमये सूर्यरश्मिः अस्माकमुपरि पतेत् इति।

परन्तु जनाः भारतीयवास्तु शास्त्रम् किञ्चिदपि न जानन्ति केवलं पूर्वद्वारं, कुबेरकोणं, पाकशाला इत्येव वास्तु इति मत्वा तस्मिन्नेव विषये दत्तमनाः सन् गृहनिर्माणकार्ये निरताः सन्ति।

वास्तुविचारः ज्यौतिषेण साकमेव प्रारभ्यते। वास्तु निर्माणकालनिर्धारणः प्राथमिकस्तरत्वेन परिगण्यते। निर्धिष्ठसमये निर्धुष्ठसमये च कृतं कार्यं सदा फलदायकं भवतीति। समुचितसमयनिर्धारणानन्तरे गृहनिर्माणकार्यं प्रारभ्यते। परन्तु जनाः भूमिचयनविषये सर्वदा न चिन्तयन्ति। यतः भूमिः या कामपि भवतु तन्त्रज्ञाः तां गृहनिर्माणोपयोगिनीं कुर्वन्ति इति। शास्त्रन्तु वदति किमपि अन्यत्। भूमिः सदा समानान्तरं भवेत्। तत्र प्रमुखं कारणं भूमेः आन्तरिकविन्यासः। तत्र मृत्तिकायाः वर्णः, रासायनिकविशेषतादयः पश्येयुः। अस्मिन् विषये मयमतमित्यस्मिन् ग्रन्थे एवमुक्तमस्ति।

**चतुरस्रं द्विजातीनां वस्तु श्वैतमनिन्दितम् ।**
**उदुम्बरद्रुमोपेतमुत्तर प्रवणं वरम् ॥**

भूमिः सर्वदा समप्रमाणम् अर्थात् दक्षिणोत्तरं, पूर्वपश्चिमं समानं भवेत्, समानान्तरचतुर्भुजमिव। मृत्तिकायाः वर्णः श्वेतः, परन्तु सम्पूर्णश्वेतः भवितुं न शक्यते। अस्य पदस्य आशयस्तु कृषरक्तादि वर्णरहितमिति अवगच्छेत्। एवमेव तत्र औदुम्बरवृक्षः अपि भवेदिति। परन्तु आधुनिकयुगे सर्वत्र औदुम्बरवृक्षयुक्तभूमिचयनं दुस्साध्यमेव हि इति चिन्तिते आन्तरिकार्थं सुलभमेव हि। औदुम्बरवृक्षस्य बहव्यः विशेषताः सन्ति। अस्मात् वृक्षात् अधिकः प्राणवायुः निस्सरति, औषधगुणयुक्तमस्ति एवमेव शताधिकप्रयोजनानि सन्ति। अस्मिन् आधुनिककाले उत्तमपरिसरस्य अपेक्षा अनिवार्या जाता। अतः एतादृशपरिसरस्य अपेक्षा दरीदृश्यते। यदि ईदृशी भूमिः न लभ्यते तदा अन्यदपि वर्णितमस्ति तस्मिन् एव ग्रन्थे। तद्यथा-

**कषायमधुरं सम्यक् कथितं तत् सुखप्रदम् ।**
**व्यासाष्ठांशाधिकायामं रक्तं तिक्तरसान्वितम् ॥**[1]

यदि समप्रमाणभूमिः न लभ्यते तदा लम्बः भूजात् अष्ठांशाधिको भूयात्, यदि शेतवर्णभूमिः नास्ति चेत् रक्तवर्णं वा कषायवर्णयुक्तमस्ति चेदपि उत्तमः एव। यदि तादृशभूमिरपि न लभ्यते चेत् अन्यदपि विकल्पः दीयते।

**प्राङ्निम्नं तत् प्रविस्तीर्णमिश्वत्यद्रुमसयुतम् ।**
**प्रशस्तं भूभृतां वस्तु सर्वसम्पत्करं सदा ॥**[2]

पूर्वदिशि विसृता भूमिः पिप्पलवृक्षसमन्विता भूमिः अर्थात् यत्र रोगनिरोधकवृक्षाः अधिकाः सन्ति सा भूमिः, एवमेव कृषिकार्ये उपयुज्यमाना भूमिः सर्वथा न उपयोजयेत् इति आचार्यः वराहमिहिरः स्वकीये बृहत्संहिता इत्याख्ये ग्रन्थे वदति।

**षडशेनाधिकायामं पीतमम्लरसान्वितम् ।**
**प्लक्षद्रुमयुतं पूर्वावनतं शुभदं विशाम् ॥**[3]

लम्बः भुजात् षष्ठांशाधिको भवेत्। प्लक्षद्रुमयुतं पूर्वदिशि विस्तृता च भवेदिति अत्र उक्तम्। एतादृशं सर्वदा शुभकरं भवति। आधुनिक वास्तुशास्त्रज्ञाः सर्वदा पश्चिमदिशि विसृता ब्भूयादिति वदन्ति। तत्र कारणं तद्दिक् शनैश्चरस्य इति उक्त्वा तत्र किञ्चित् प्रदेशः रिक्तः भवेत्। एवमेव विसृता च। परन्तु तत्तु शास्त्र सम्मतं न इति वक्तुमहमिच्छामि।

एवम् अस्मिन् मयमतमिति ग्रन्थे गृहनिर्माणावसरे भूमिचयनं कथं कुर्यादिति अस्माभिः ज्ञातम्।

अन्यैः आचार्यैः अपि अस्मिन् विषये बहुधा उक्तमस्ति। तत्र मानसारनामके ग्रन्थे एवमस्ति। -

**तेतिलाश्च नराश्चैव यस्मिन्यस्मिन् परिस्थिताः ।**
**तदस्तु सूरिभिः प्रोक्तं तथा वै वक्ष्यतेऽधुना।।**
**धराहर्यादि यानं च पर्यङ्कादि चतुर्विधम्।**
**धरा प्रधानवस्तु स्यात्तत्तज्जातिषु सर्वशः।।4**

अस्यैव समर्थं भोजराजः स्वकीये समराङ्गणसूत्रधारः नामके ग्रन्थे वर्णयतै।

**देशः पुरं निवासश्च सभा वेश्मासनानि च।**
**यद्यदीदृशमन्यच्च तत्तच्छरेयस्करं मतम्।।**
**वास्तुशास्त्रादृते तस्य न स्याल्लक्षणनिश्चयः।**
**तस्माल्लोकस्य कृपया शास्त्रमेतददीर्यते।।**[5]

विश्वकर्मा अपि एवं वदति।

**देवतानां नराणाञ्च गजगोवाजिनामपि।**
**निवासभूमिश्शत्पकर्वास्तुसंज्ञमितीर्यते ॥**
**दष्टिका च शिला दारुरयःकीलादयोऽप्यमी।**
**वास्तुकर्मणि चान्यत्र वास्तुसंज्ञमुदीरितम्।।**[6]

भूमिचयनानन्तरे अस्माभिः अवश्यं ज्ञातव्यं किमित्युक्ते किदृशी भीमिः अस्माभिः त्याज्या इति।

यत्र वा यस्यां शवसंस्कारः क्रियते वा कृता अस्ति सा भूमिः सर्वदा त्याज्या। तथैव यस्यां प्राणि पक्षिणां गन्धः अस्ति अर्थात् तेषां दुर्गन्धः यत्र वर्तते सा अपि वर्ज्या एव। देवालयस्य समीपे अर्थात् देवालयस्य कलशस्य छाया यस्याः उपरि पतति तस्याः भूमेः चयनमपि न कुर्यात्। राज्ञः गृहस्य समीपे अपि गृहं न कारयेत्। अद्य राजानः न सन्ति। अतः तेषे स्थाने राजकीयनेतारः सर्वकारीय अधिकारिणः च सन्ति। तेषां गृहाणां समीपे गृहनिर्माणं न कुर्यादिति अभिप्रायः।

**एवमीनपक्षिगन्था सा धरा निन्दिता वरैः।**
**सभायैत्यसमीपस्था नृपमन्दिरसभश्रिता ॥**[7]
**देवालयसमीपस्था कण्टकिद्रुमसंयुता ।**
**वत्तत्रिकोणविषमा वन्राभा कच्छपोन्नता ॥**[8]
**चण्डालावासगच्छाया चर्पकारालयाश्रिता।**
**एक द्वित्रिचतुमर्गातरिताव्यक्तमार्गका ॥**[9]
**एवमेव वास्तुशास्त्रज्ञाः बहुधा अवदन्।**

भूमिचयनानन्तरे गृहनिर्माणार्थं समुचितमुहूर्तस्यावश्यकता भवति। तत्र जौतिष्शास्त्रम् अस्माकमेकमेव शरणम्। अत्र अस्य विवरणम्धिकं भवेदिति मया न वक्ष्यते।

भूमि पूजनं कृत्वा भूमातां प्रति अनुमर्तिं प्रार्थयेत्। तदनन्तरे गृहनिर्माणकार्यं प्रारभ्यते। तत्र अधुना द्वारस्य स्थापना कस्यां दिशि भवेदित्यत्र अस्माकं शास्त्रमेवं वदति।

| क्र. सं | राशिः | दिक् |
|---|---|---|
| १. | मेषः | पूर्वः / आग्नेयः |
| २. | वृषभः | दक्षिणः / आग्नेयः |
| ३. | मिथुना | पश्चिमः / वायव्यः |
| ४. | कर्कः | उत्तरः / वायव्यः |
| ५. | सिंहः | पूर्वः |
| ६. | कन्या | दक्षिणः |
| ७. | तुला | पश्चिमः |
| ८. | वृश्चिकः | उत्तरः |
| ९. | धनुः | पूर्वः / ईशान्यः |
| १०. | मकरः | दक्षिणः / नैऋत्यः |
| ११. | कुम्भः | पश्चिमः / वायव्यः |
| १२. | मीनः | उत्तरः / ईशान्यः |

गृहनिर्माणं यः करोति तस्य जन्मनक्षत्रमवलम्भ्य जन्मराशिः निर्धार्यते। तद्वारा एव जनाः द्वारस्य दिक् निर्धार्यते। परन्तु न केवलं जन्मराशिः अत्र। ज्यौतिष्शास्त्रद्वारा अन्ये मार्गाः अपि सन्ति। तथैव तज्ज्ञानं अन्यत्। परन्त्वत्र केवलं गृहनिर्माणावसरे अनुसरमाणनियमानां विषये एव जानीमः।

अधुना गृहनिर्माणावसरे अनुसरमाण केचनविशेषनियमाः वक्ष्यन्ते।

वाटभित्तिविधानम्

**चतुर्दण्डात् समारभ्य द्विदविहस्तविवर्धनात्।**
**त्रिशब्धस्तावधिर्यावदेकेक गृहमानकम्।**
**क्षुद्राणामष्टधा प्रोक्तं मध्यमानां विधीयते।**
**अष्टदण्डात् समारभ्य द्विद्विदण्डविवर्धनात्।**
**द्वात्रिंशदण्डपर्यन्तं गृहाणां मानमिष्यते ।**
**अस्मादाज्तदण्डान्तं दण्डाभ्यां वर्धयेत्क्रमात् ।**
**वाटभित्तेरिदं मानं तदभ्यन्तरतो गृहम् ॥**[10]

चतुर्दण्डादारभ्य द्विहस्तवर्धनात् त्रिंशत् हस्तपरिमितम् गृहमानकं भवेत्। अत्र दण्डप्रमाणं कियदिति विवक्षिते चतुर्हस्तप्रमाणमिति वक्तुं शक्यते। क्षुद्रगृहमानं अष्टदण्डात् प्रारभ्यते तत्र द्वुहस्तप्रमाणं द्वात्रिंशत् पर्यन्तं योजयेत्। तत्रैव यदि पुनः द्विहस्तप्रमाणं योजयित्वा शतपर्यन्तं योजिते सति उत्तमगृहमानं भवति। एवं वाटभित्तिनिर्माणं कारयेत्। वाटभित्तयः चतुर्षु दिक्षु द्वाराः स्थाप्येरन्। तत्रापि प्रधानद्वारात् विंशत्यंशनूनमानकं द्वारं प्रदक्षिणक्रमेण भवेयुः। अर्थात् यदि पूर्वदिशि प्रधानद्वारः भवति चेत् अग्रिमः द्वारः दक्षिणदिशि भवेत्। एवं जानीयात्। तत्र द्वारं कथं भवेदिति प्रश्नः उद्भूयते। तथैव प्राथमिककार्यं किमिति प्रश्नः उद्भवति। तस्य समाधानमेवं क्रियते।

**कर्तव्यं वास्तुमध्ये तु मण्डपं प्रथमं बुधैः ।**
**वास्तुव्यासचतुर्भागः मण्डपस्य तु विस्तृतम् ।।**
**पञ्चषट्सप्तभागाष्टनवभागैकमेव वा।**
**सप्तहस्तादि षण्मानं द्विद्विहस्तविवर्धनात् ॥**[11]
**आसप्तदशहस्तान्तं श्रेष्ठमध्यकनिष्ठकम् ।**

स्थपतिमहाशयः वास्तुमन्डलं कुर्यात्। अस्य श्लोकस्य अर्थं सरलं भवति। वास्तुमण्डलं कृत्वा तत्र मध्यमण्डलस्य निर्धारणं कुर्यात् इत्यादयः।

द्वारनिर्धारणमपि अस्माकं वास्तुग्रन्थे वर्णितमस्ति। प्रधानद्वार-निर्माणार्थं शाकवृक्षः, नन्दीवृक्षः, फ्नसवृक्षः वा उपयोजयेदिति। यतः शाकवृक्षो ऋणात्मकशक्तिनोरोहकत्वेन कार्यं निर्वहतीति मत्स्यपुराणे वर्णितमस्ति। तथैव नन्दी वृक्षमपि। फनसवृक्षस्य विशेषता अन्या अस्ति। सा किमित्युक्ते देवतावासः तत्रापि चौडी देवतायाः निवासत्वेन परिगण्यते फनसवृक्षः। तथैव आन्तरिकद्वारानां वृक्षाः नन्दीं विहाय यः कश्चिदपि भवतु तथैव न कुत्रापि चन्दनतरोः वा रक्तचन्दनतरोः उपयोगः क्रियताम्। पूजामन्दिरस्य द्वारं चन्दनवृक्षादपि कर्तुं शक्यते। एषां विवरणं अस्माकं पौराणिकग्रन्थेषु उपलभ्यन्ते। तत्र समराङ्गणसूत्रधारः अपि समर्थयति।

गवाक्षाणां निर्माणावसरे पुनः शाकवृक्षाणां सालवृक्षाणां पिप्पलवृक्षाणाम् उपयोगः क्रियताम्। तत्र सङ्ख्या का इत्युक्ते द्वारसङ्ख्या त्रिगुणितं कृत्वा तस्मादधिकसङ्ख्याकगवाक्षाणां निर्माणं कारयेदिति आचार्याणां वचनम्। अस्मात् अस्माभिः ज्ञातव्यं यत् इत्युक्ते अस्माकं पूर्वजाः नैसर्गिकदीपः वायुः इत्यादिकं प्राप्तुः ते समुचितोपायेन गृहनिर्माणं कुर्वन्ति स्म इति।

देवपूजागृहनिर्माणावसरे तेषां कुलदेवतानां गृहस्य परिमाणं तथैव वर्णानाम् आधारेण कुर्वन्ति स्म। आधुनिके काले वर्णानाम् आधारेण न कुर्यात् परन्तु इतरेषाम् अंशानां परगणनं कुर्यात्। वाटभित्तिः, सम्पूर्णगृहस्य विस्तीर्णं देवतासङ्खाभिः अविभाजयेत्। आगतः लब्धिः एकत्र स्थाप्यताम्। तं पुनः वर्गमूलं कुर्यात्। सा सङ्ख्या देवपूजागृहस्य परिमाणं भवतीति। वास्तुपुरुषस्य हृदयभागः ब्रह्मस्थानमिति कथ्यते।

तथैव ईशान्यं देवसम्बन्धी दिक् इति कथ्यते। तस्मिन् दिशि अपि पूजागृहं स्थाप्येताम्। उत्तरं वा पूर्वं वा अपि गृह्णीताम्। न कदापि नैऋत्यम्, दक्षिणम् वा दिक् देवपूजा प्रकोष्ठार्थं न परिगण्यन्ते। यतः दक्षिणं यमस्य नैऋत्यं निऋतेः च आधिपथ्यं दिक् इति। अस्मात् कारणां तत् दिक् देवपूजार्थं न परिगण्यते। इति शास्त्रवचनम्।

गृहाभ्यन्तरे देवपूजागृहे प्रतिष्ठापितस्य देवविग्रहस्य परिमाणं पञ्चाङ्गुल्यात् अधिकधैर्घ्यं न भवेत्। यदि दौर्ह्यविग्रहं गृहे स्थाप्यते चेत् तस्य देवस्य पूजाविषये बलिकार्यादि नियमाः अनुसरेयुः। तन्त्रयुक्तपूजामन्त्राणां पठनमपि कुर्यात्। नैवेद्यादि विषये विशेषता पालनीया। शौचादि विषये विशेषनियमां पालनीया। एवमेव दैर्घ्यपूजाविधानं अनुसरेयुः। परन्तु गृहे तान् नियमान् अनुसर्त्तुं तत्रापि प्रतिदिनं न शक्यते। अतः शास्त्रवचनानुसारेण पञ्चाङ्गुल्यात् न्यूनविग्रहः पूजयेत।

शयनप्रकोष्ठानां परिमाणं कथं निर्धार्यते इत्युक्ते द्वादश, पञ्चदश, अष्टादश, एकविंशति, चतुर्विंशतिः सङ्खानां वर्गसङ्ख्याप्रमाणकं प्रकोष्ठविस्तीर्णं भवेत्। प्रधानसदस्यस्य गृहस्य प्रकोष्ठः सर्वदा नैऋत्यदिशि एव भवेत्। सर्वेषां शयनप्रकोषानां नैऋत्यदिशि निर्मितः प्रकोष्ठः ज्येष्ठतमः भवेत्। तत्र न कस्यापि देवस्य प्रतिमा भवेत्। न कदापि ईशान्यदिशि शयनप्रकोष्ठः निर्मीयते। ब्रह्मस्थाने अपि प्रकोष्ठः न भवेत्।

पाकशालायाः निर्माणार्थं सर्वदा आग्नेयदिक् एव परिगण्यते। न कदापि नैऋत्यदिक् परिगण्यते। आधुनिककाले तस्य प्रकोष्ठस्य परिमाणं निर्धारणार्थं न किमपि मानदण्डः परिगण्यते। परन्तु शास्त्रीयवचनानुसारेण गृहस्य विस्तीर्णस्य षोडशांशः स्थापयेत्। पाकशालायाः प्रकोष्ठस्य द्वारद्वयं भवेत्। तस्य त्रिगुणितं गवाक्षसंङ्ख्या भवेत्। धूमनिस्सरणार्थं योग्यव्यवस्था भवेत्। तस्य गृहस्य उत्तरभागे धान्यसङ्ग्रहणप्रकोष्ठः भवेत्। सः प्रकोष्ठः एकद्वारयुक्तः, गवाक्षैकेन युतः स्यात्। गृहिणी एव तस्य प्रकोष्ठस्य अधिकारिणी भवेत्। तस्य प्रकोष्ठस्य तालादिकं तस्याः समीपे एव स्थीयते।

**अन्नप्राशनमार्यांशे चन्द्रांशे च सविन्द्रके ॥**
**श्रवणं तु विवस्वांशे मित्रांशे तु विवाहकम् ।**
**क्षौरमिन्द्रजये विद्याद् वायौ सोमे च सम्मतम् ॥**
**व्ययं चोपनयं चैव पितृदौवारिके जले।**
**सुगले पुष्यदन्ते चं प्रसूतिगृहमिष्यते ॥**
**जलकोशमापवत्से कुण्डमापे विधीयते ।**
**अङ्कनं तु महेन्द्रांशे पेषणी च महीधरे ॥**[12]

अन्नप्राशनस्थानम् आर्य-इन्द्र-सविन्द्रस्थाने भवेत्। वेदादिनाम् अभ्यासः विवस्वतः स्थाने, वृइवाहस्थानं मित्रस्थाने, क्षौरम् इन्द्रजयस्थाने, आयव्ययादि गणना पितृस्थाने भवेत्। प्रसूतिगृहं पुष्पदन्तस्थाने, जलकोषः आपवत्सस्थाने, जलकुण्डं आयस्थाने अङ्कनं महेन्द्रस्थाने भवेयुः इति मयमते उक्तम्।

प्रधानप्रकोष्ठः अधिकाधिकासनैः युतः भवेत्। प्रधानद्वारात् किञ्चिदेव दूरे भवेत्। सम्पूर्णगृहस्य षष्ठांशपरिमितं भवेत्। सुयोग्यवायुसञ्चारः, सुयोग्यदीपव्यवस्था च भवेत्। गृहस्य सर्वे सदस्याः तत्रैव उपविश्य सम्भाषणं कर्त्तुं सुयोग्यं भवेत्। तथैव प्रधानद्वारात् एनं प्रकोष्ठं प्रवेष्टुं अल्पीयकं प्रकोष्ठमेकं तीर्त्वा एव आगन्तव्यम्। तादृशव्यवस्था भवेत्। तत्र स्तम्भादिकं भूयात्।

यदि गृहे सोपानादिकं भवेत् चेत् तत् प्रदिक्षिणरूपेण एव भवेत्। अर्थात् अवामभागे एव तस्य गमनं भवेत् न तु वामभागं प्रति। एवमेव सोपनस्य सङ्ख्या असमसङ्ख्या एव भूयात्। अर्थात् एकविंशति, त्रयोविंशति इत्यादीनि। सोपानमार्गस्य मूले जलं स्थाप्येत।

शौचालयस्तु प्राचीनाम् अभिप्रायानुसारेण गृहात् बहिः एव भवेत्। तदर्थं तैः उक्तं यत्, गृहपरिमाणं रिक्तस्थानं गृहस्य पार्शे परन्तु न तु ईशानभागे वा नैऋत्यभागे वा कारयेत्। एवमेव कूपसमीपे वा तडागसमीपे वा न कारयेत्। स्नानगृहमपि एवमेव हि। गोशाला तु गृहस्य दक्षिणे भागे कुर्यात्। गोशाला यत्र भवति तत् दिक् शुभदिक् इत्येव परिगण्यते। यतः सर्वे देवताः तत्रैव तिष्ठन्ति।

एवं निर्मिते गृहे केवलं धनात्मकशक्तेः सञ्चारः एव भवेत्। तथैव देवतानुग्रहः अपि भवेदिति धिया गृहप्रवेशः कुर्यात्। तदपि गृहनिर्माणकार्यं सम्पूर्णं यदा भवति तदा एव। तत्र शीघ्रता न कार्या। वा गृहप्रवेशानन्तरे गृहनिर्माणकार्या न कारयेत्। एवमेव गृहनिर्माणकार्यं यदा सम्पूर्णं भवति तदा अपि अविलम्भेन गृहप्रवेशः क्रियते। तदा स्थपतिः सम्मानितः भवति। तस्मै श्वेतवस्त्रादि दानं दद्यात्। एवं कृते गृहप्रवेशकार्यमपि सम्पूर्णं भवति। अनेन प्रकारेण निर्मितं गृहं सदा शुभदं भवति इति शास्त्रवचनम्।

पूर्वोक्तानां विषयाणामेव मत्स्यपुराणेऽपि उक्तम्।

**पूर्व्वेण वर्द्धितं बास्तु कुर्य्याद्वैराणि वै सदा । दक्षिणे वर्द्धितं वास्तु मृत्यवे स्यान्न संसयः ॥ पश्चाद्वृद्धन्तु यद्वास्तु तदर्थक्षयकारकम् । वर्द्धायितं तथा सौम्ये बहुसन्तापकारकम् ॥ आग्नेये यत्र वृद्धिः स्यात् तदग्निभयदम्भवेत्। वर्द्धितं राक्षसे कोणे शिशुक्षयकरं भवेत् ॥ वर्द्धायितन्तु वायव्ये वातव्याधिप्रकोपकृत् । ईशाने तु प्रजाहानिर्वास्तौ सम्बर्द्धिते सदा ॥ ईशाने देवतागारं तथा शान्तिगृहं भवेत् । महानसं तथाग्नेये तत्पार्श्वे चोत्तरं जलम् ॥ गृहस्योपस्करं सर्व्वं नैरृते स्थापयेद्बुधः। बन्धस्थानं बहिःकुर्य्यात् स्नानमण्डपमेव च॥ धनधान्यञ्च वायव्ये कर्म्मशाला ततो बहिः । एवं वास्तुनिवेशः स्यात् गृहभर्त्तुः शुभावहः॥ " इति मात्स्ये वास्तुविद्यागृहनिर्णयो नाम २३०** अध्याये वर्णितम्।

**उपसंहारः –**

अस्माकं पूर्वजाः सर्वदा परसरविषये जागरूकः सन् गृहनिर्माणादि कार्यं कुर्वन्ति स्म। ते न कदापि परिसिरनाशं कृत्वा जीवनं यापितवन्तः। अतः एव परिसरोऽपि तेषां विषये प्रीतः आसीत्। तथैव तेषां जीवनमपि शान्तियुतं सुसमृद्धं, ऐश्वर्ययुतञ्चासीत्। ये वास्तुविषये जागरूकः भवन्ति ते सर्वे न कदापि व्यथन्ति। यथा न तक्रसेवी व्यथते कदाचिदिति सुश्रतः अवदत्। तथैव अत्रापि न वास्तुमार्गेरतः व्यथते कदाचित्। परन्तु अस्मिन् आधुनिककाले सकलरीत्या वास्तुशास्त्रोक्तानां विचाराणाम् अनुसरणं साध्यम्। तदर्थं ३००*३०० अर्थात् ९०००० पदपरिमितं भूमेः आवश्यकता भवति। तत्तु नगरप्रदेशे दुस्साध्यमेव हि। एवं स्थिते किं कार्यमिति चिन्ता बाधते। तस्य समाधानम् एवं कर्त्तुं शक्यते। कर्त्तुः जातकवशात् निर्माणं कुर्यात्। तदर्थं किञ्चित् व्यत्यासः अपेक्ष्यते। तत् कुर्यात्। इत्यादयः। एवमेव परिसररक्षणेऽपि दत्तमनाः भवेयुः। अनेन पृथ्वी सुजला, सस्यश्यामला च भवति। अतः एव न केवलं कलियुगे अपि तु त्रेता, द्वापरादि युगेऽपि वास्तुशस्त्रज्ञाः आसन्। तेषां नामानि अद्यापि श्रूयते। यथा, मयः,

विश्वकर्मः इत्यादयः। वयमपि तान् नियमान् अनुसराम। तद्वारा भारतीय वास्तुशास्त्रस्य प्रयोजनं प्राप्नुमः इत्युक्त्वा विरमामि।

**ग्रन्थासूची**

१. मयमतम् भूलक्षणम् अध्यायः
२. मयमतम् भूलक्षणम् अध्यायः
३. मयमतम् वास्तुलक्षम् अध्यायः
४. मानसारः
५. समराङ्गणसूत्रधारः
६. विश्वकर्मा वास्तुशास्त्रम्
७. मयमतम् चतुर्गहविधानम्
८. मयमतम् चतुर्गहविधानम्
९. मयमतम् चतुर्गहविधानम्
१०. मयमतम् चतुर्गहविधानम्
११. मयमतम् चतुर्गहविधानम्
१२. मयमतम् चतुर्गहविधानम्

**आकरग्रन्थाः**

१. मयमतम् मयासुरः चौखाम्बा प्रकाशनम् वारणासी। शैलजा पाण्डेय व्याख्या अध्याये वर्णितम्।

अ) भूपरीक्षा

आ) मृत्तिका परीक्षा

इ) वास्तुप्रकारः

ई) चतुर्गृहविधानम्

उ) गृहप्रवेशः

२. मानसारः

अ) भित्तुरचना

आ) देवालयनिर्माणम्

३. समराङ्गणसूत्रधारः
सारस्रूपेण स्वीकृता अस्ति।
अन्येषां वास्तुशास्त्रज्ञानां लेखनानि पठितानि।
केषाञ्चन वास्तुशास्त्रज्ञानां सन्दर्शनमपि कृतम्।

४. आर्चिव्.आर्ग् इति वेब् सैट् परिशीलितम्

५. विविधपुराणानि (मत्स्य – मार्कण्डेय – कूर्म – गरुड – स्कान्ध इत्यादयः)